तमैकद्वित्रितदधिकान्यतमदिनवृत्त्याकालिकवृष्ट्युत्तरैकत्रिसप्ताहान्यतमदिनादि, रूपो मलमासतत्त्वाद्युक्तः तत्तद्विहितकर्म्मसु पर्य्युदस्ततयाऽभिहितः कालः एतत्प्रमाणानि सम्प्रति प्रसवं मलमासतत्त्वमुहूर्त्तचिन्तामण्यादौ द्रष्टव्यानि "अकाले वीक्षितो विष्णुर्हन्ति पुण्यं पुराकृतमिति" पु० । अप्राप्तः अनुचितः कालः प्रा०त० । अप्राप्तकाले "नाकाले म्रियते कश्चित् प्राप्ते काले न जीवतीति" पुराणम् । "अकालजलदोदय" इति रघुः । "अकालमृत्युहरण"मिति तन्त्रम् । "वर्त्त्याधारस्नेहयोगात् यथा दीपस्य संस्थितिः । विक्रियापि हि दृष्टैवमकाले प्राणसंक्षय" इति याज्ञ० । "अकालजन्तु विरसं न धान्यं गुणवत् स्मृत"मिति, वैद्य० । "नाकालवृष्टौ कुर्व्वीत व्रतबन्धशुभक्रियामिति" स्मृतिः अनुचितकाले वृष्टाविति तदर्थः । "वरमेकाङ्गतिः काले नाकाले लक्षकोटयः इति ति०त० । नास्ति कालोपाधिजन्यजातमत्र । जन्यशून्ये प्रलये । "अकालकालमेघमेदुरेति काद० । अप्राप्तः कालो यस्य प्रादिभ्यः धातुजस्येति ब० अन्यलोपश्च । अप्राप्तकाले अनुचितकाले पदार्थे त्रि० । कालः कृष्णः न०त० । कृष्णविरुद्धशुभ्रवर्णे पु० । कृष्णविरोधिशुभ्रत्ववति त्रि० ।

**अकिञ्चन** त्रि० नास्ति किञ्चन यस्य मयूर०त० । निर्धने, "अकिञ्चनः सन् प्रभवः स सम्पदा"मिति कुमा० । दरिद्रे, "अकिञ्चने किञ्चननायिकाङ्के किमारकूटाभरणेन न प्रिय" इति नैषधम् ।

**अकिञ्चनता** स्त्री० अकिञ्चनस्य भावः तल् । संन्यासाङ्गे सर्व्वद्रव्यत्यागरूपे यमविशेषे "व्रतं दानं परिव्रज्या तपस्या नियमस्थितिः । अहिंसाऽसूयतास्तेयब्रह्माकिञ्चनता यम" इति स्मृतिः ब्रह्म वेदमन्त्रः ईश्वरमननं वेत्यर्थः । निर्द्धनत्वे च । भावे त्व । तत्रैवार्थे न० । "स्थाने भवानेकनराधिपः सन्नकिञ्चनत्वं मखजं व्यनक्तीति" रघुः ।

**अकिञ्चिज्ज्ञ** त्रि० न किञ्चित् जानाति ज्ञा—क अश्राद्धभोजीतिवत् असमर्थस० । किञ्चिदनभिज्ञे, किञ्चिद्ज्ञानशून्ये, अल्पज्ञाने, ज्ञानशून्ये च ।

**अकिञ्चित्कर** त्रि० न किञ्चित् करोति कृ-अच् असमर्थस० । किञ्चिदकारके क्रियाशून्ये, निष्प्रयोजने च ।

**अकुण्ठ** त्रि० नास्ति कुण्ठा यस्य । प्रतिबन्धशून्ये, कर्म्मदक्षे च ।

**अकुतोभय** त्रि० नास्ति कुतोऽपि भयं यस्य मयू०स० । कुतश्चिदपि भयशून्ये ।

**अकुप्य** न० गुप्यते निस्वताव्यञ्जकतया—लज्जाकरत्वात् गुप—क्यप् नि० कस्य पः कुप्यं रैत्यादि न०त० । स्वर्णे, रूप्ये च ।

**अकुमार** त्रि० न कुमारः । अतीतकौमारावस्थे तरुणे ।

**अकुल** त्रि० अप्रशस्तं कुलमस्य न० ब० । अप्रशस्तकुले "कुलान्यकुलतां यातीति" मनुः ।

**अकुशल** त्रि० न कुशलं मङ्गलमस्य । मङ्गलविरोध्यमङ्गलयुक्ते । न०त० । कुशलविरोधिनि अभद्रे न० । दक्षभिन्ने त्रि० ।

**अकूपार** पु० न कूपमृच्छति ऋ—अण् । वृहत्कच्छपे । न कुं पृथ्वीं पिपर्त्ति पृ-पालनपूरणयोः अण् बा०दीर्घः, न कुत्सितं पारं गन्तव्यदेशो यस्य वा, पृ०दीर्घः । महापारे समुद्रे, दूरगामिनि सूर्य्ये च पु० । पृ० । अकूवारोऽप्यत्र ।

**अकृत** त्रि० कृ-कर्म्मणि क्त न०त० । कृतभिन्ने अन्यथाकृते । "कृताकृतावेक्षणादौ ब्रह्मा ऋत्विक् नियुज्यते" इति याज्ञिकप्रसिद्धिः । "अकृतव्यूहाः पाणिनीया" इति परिभाषा । न कृतो व्यूहः विशेषेण ऊहोयैः विनाशोन्मुखं दृष्ट्वा कृतमपि कार्य्यं नाशयन्तीति तदर्थः सि०कौ० । बलपूर्व्वकृते ऋणलेख्यपत्रादौ च "सर्व्वान् बलकृतानर्थानकृतान् मनुरब्रवीदिति" मनुः । "बलात् कुरुत पापानि सन्तु तान्यकृतानि वः । सर्व्वान् बलकृतानर्थानकृतान् मनुरब्रवीदिति" नैषधम् । पुत्रिकात्वेन अकल्पितायां दुहितरि स्त्री । "अकृता वा कृता वापि यं विन्देत् सदृशात् सुतमिति" स्मृतिः । भावे क्त अभावार्थे न०त० । करणाभावे निवृत्तौ "नैव तस्य कृतेनार्थो नाकृतेनेह कश्चनेति" गीता ।

**अकृतज्ञ** त्रि० न कृतं जानाति ज्ञा-क असम०स० । कृतोपकारास्मारके, कृतघ्ने, "आत्मारामाः पूर्णकामाः अकृतज्ञा गुरुद्रुह" इति भागवतम् ।

**अकृतिन्** त्रि० कृतमनेन कृत+इनि न०त० । कार्य्याक्षमे क्रियासु पाटवरहिते ।

**अकृत्य** न० कृ-क्यप् अप्राशस्त्ये न०त० । दुष्टकार्य्ये चौर्य्यादिकरणे । न कृत्यमस्य न०ब० । कर्म्मरहिते त्रि० ।

**अकृत्रिम** त्रि० न कृत्रिमः न०त० । कृत्रिमभिन्ने स्वभावसिद्धे । "कृत्रिमाकृत्रिमयोर्मध्ये कृत्रिमे कार्य्यसंप्रत्यय" इति परिभाषा "अकृत्रिमस्नेहरसानुविद्धमिति" ।

**अकृत्वा** अ० न कृत्वा न+कृ-क्त्वा । करणानन्तर्य्ये "अकृत्वा कुलसन्ततिमिति" मनुः ।

**अकृष्टपच्य** त्रि० अकृष्टे क्षेत्रे पच्यते पच-क्यप् ७त० । हलाद्यकृष्टक्षेत्रे पच्यमाने नीवारादौ शस्ये ।